# उच्यतां सुसंस्कृतं सदा

उच्यतां सुसंस्कृतं सदा
गीयतां सुविजयगीतिका ।।

सुरसभासु संसेव्यमानमनिशं नारदादिदेवर्षिभिरनुगीतं ।
वेदव्यासानां दयया भुवि प्राप्तं
गीर्वाणानां मधुरं वचनं श्रवणपुटेन हि सततं पेयम् ।।

ग्रामे ग्रामे संस्कृतसल्लपनं नगरे नगरे संस्कृतसंचलनम् ।
भगरतीयसत्संस्कृत्युद्धरणार्थं
नवरसभरितं संस्कृतवचनं भरतभूतले वर्षतु सततम् ।।

नवसमाजनिर्माणं तव ध्येयं संस्कृतसंभाषणमिह तव द्वारम् ।
लघुबालानां संस्कृतव्यवहारेण
जयतीर्थानां विद्यापीठं भवतु भरतभूतलविख्यातम् ।।